**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 13 Issue 7, July- 2023
ISSN(o): 2249-7382 | Impact Factor: 8.018
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

# दर्शनान्तरेषु सिद्धसिद्धान्तपद्धत्याः प्रभावः

**डा.अशोक कुमार मीणा**
**सह-आचार्यः शाखाध्यक्षश्च**
**सांख्ययोगविद्याशाखा, पुरी परिसरः**

**<u>दर्शनशब्दस्योत्पत्तिः</u>**

दर्शन इत्ययं शब्दः दृश् धातोःभावकरणयोर्ल्युडिति प्रत्यये कृते निष्पद्यते। दृश्यते ज्ञायते परमं तत्त्वमनेन इति दर्शनम्। दर्शनं नाम सदसज्ज्ञानसोपानमिति। आङ्ग्लभाषायां दर्शनशब्दः Philosophy इति उच्यते। अयं Philosophy शब्दः Philein (to love) तथा Sophia (wisdom) इति ग्रीक्शब्दयोः मिश्रणेन निष्पद्यते। अतः Philosophy इत्यस्यार्थः The love of wisdom अस्ति। अतः दर्शनशब्दस्य शाब्दिकार्थः 'ज्ञानं प्रति प्रेम' तथा च दार्शनिका 'ज्ञानप्रेमिणः' इति कथ्यन्ते।

भारतीयदर्शनशास्त्रवाङ्मयं द्विधा विभज्यते। आस्तिकदर्शनं नास्तिकदर्शनञ्चेति। अस्ति पारलौकिकविषये प्रवृत्तिर्यस्य सः आस्तिकः, नास्ति च पारलौकिकविषये प्रवृत्तिर्यस्य सः नास्तिकः। तत्र आस्तिकानि वेदसमर्थकानि भवन्ति। तानीश्वरस्य सत्तामङ्गीकुर्वन्तीति हेतोः सेश्वरवादिन इत्यपि कथ्यते। सांख्य- योग- न्याय- वैशिषिक- वेदान्त- मीमांसादर्शनान्यास्तिकदर्शनानि सन्ति। नास्तिकदर्शनेषु चार्वाक- जैन- माध्यमिक- योगाचार- सौत्रान्तिक- वैभाषिकाः इति।

भारतीयमनीषिणाम् उक्तिरस्ति यत् साक्षादनुभवेन दर्शनेन श्रवणेन यत् ज्ञानं भवति, तदेव दर्शनम्। यद्यपि शब्दविचारज्ञानेन सत्यस्याशः प्रकटयति अतः विरोधात्मिकापि भवितुं शक्यते परन्तु पूर्णसत्यस्यानुभवः कर्तुं न शक्यते। पूर्णसत्यस्यानुभवाय दर्शनज्ञानस्यावश्यकतास्ति। भारतीयदार्शनिकपरम्परायां द्वादशदर्शनानि सन्ति। तेषु सर्वेषु दर्शनेषु योगस्य यत्किञ्चत् प्रभावः परिलक्ष्यत एव।

सर्वेषां मनुष्याणां चरमोद्येश्यं मोक्ष प्राप्तिरेव भवति। मानवस्य सामान्यव्यवहारादाराभ्य मोक्षपर्यन्तं योगस्यावश्यकता परिलक्ष्यते। एतदभिलक्ष्य सर्वेषु शास्त्रेषु योगस्य प्रभावः दृश्यते। भारते योगशास्त्रस्यानेकाः ग्रन्थाः उपलभ्यन्ते। योगस्यापि नाना भेदाः वर्त्तन्ते। ते यथा- हठयोगः, राजयोगः, कर्मयोगः, मन्त्रयोगः, लययोगः, ज्ञानयोगः, भक्तियोगः इति। एतेषु हठयोगस्य योगवाङ्मये महत्वपूर्णं स्थानं वर्तते। हठयोगस्य सम्प्रदायत्वेन नाथसम्प्रदायसाहित्ये वर्णितं गोरक्षनाथकृतसिद्धसिद्धान्तपद्धतिनाम्नि पुस्तके योगस्य अभिनवोपायाः दृश्यन्ते। सिद्धसिद्धान्तपद्धत्याः षष्ठोपदेशे श्रीगोरक्षनाथेन उक्तमस्ति अवधूतः सर्वदर्शनानां स्वस्वरूपदर्शने समन्वयं करोति। यथा-

**जितेन्द्रयश्च भगवान् स सुधी कोविदो बुधः।**

**चार्वाकश्चार्हतश्चेति तथा बौद्धः प्रकाशवित्॥**

**तार्किकश्चेति सांख्यश्च तथा मीमांसको विदुः।**

**देवतेत्यादि विद्वद्भिः कीर्तितः शास्त्रकोटिभिः।**

**आत्मेति परमात्मेति जीवात्मेति पुनः स्वयं।**

**अस्ति तत्त्वं परं साक्षाच्छिवरुद्रादिसंज्ञितम्॥**[1]

## सांख्यदर्शने प्रभावः

सर्वेषु दर्शनेषु सांख्यदर्शनं प्राचीनदर्शनत्वेन ज्ञायते। सम्यक् प्रकारेण क्रमपूर्वकं ख्यानं कथनं यस्याः सा सांख्या। पञ्चविंशतितत्वानां विचार एव सांख्यम्, तमाधारीकृत्य कृतो ग्रन्थः सांख्यमित्युच्यते। सांख्य शब्दः सम् उपसर्गपूर्वकं चक्षिङ् धातोः अण् प्रत्ययेन निष्पद्यते। अस्यार्थः सम्यकज्ञानमिति निश्चीयते। सांख्यदर्शनस्य प्रवर्तकः देवहूतिकर्दमयोः पुत्रः महर्षिकपिलः। सांख्ये प्रकृतिः पुरुषश्चेति मूलतत्वद्वयमिति, अनयोरेव सम्बन्धाज्जगदुत्पद्यते। प्रकृतिर्जडा, पुरुषश्चेतनः, पुरुषसम्बन्धात् प्रकृतौ क्रिया। सत्कार्यवादोऽत्र समर्थितः।

**नास्ति सांख्यसमं ज्ञानं, नास्ति योगसमं बलम्।**

**अत्र वः संशयो माभूत्, ज्ञानं सांख्यं परं स्मृतम्॥**

**संख्यां प्रकुर्वते चैव प्रकृतिश्च प्रचक्षते।**

**तत्त्वानां चतुर्विंशतिस्तेन सांख्याः प्रकीर्तिताः॥**[2]

सत्वादिगुणानां महदादिकरणानां प्रकृतिपुरुषयोश्च वर्णनं उपनिषत्सु अनेकेषु स्थलेषु समुपलभ्यते, पुराणेतिहासादिषु च भूयोभूयः प्रशंसितमस्ति सांख्यदर्शनम्। अत्र मते पञ्चविंशतितत्वानि-

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।**

**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥**[3]

प्रकृतिपुरुषविषयभेदज्ञानजन्यमुक्तिलाभ एव अस्य प्रयोजनं भवति। अत्र पञ्चविंशतितत्वानां विचारः क्रियते। एतेषां सम्यज्ज्ञानेन मोक्षो लभ्यते इति दर्शनस्यास्य प्रमुखः सिद्धान्तः। तत्रोच्यते-

---

[1]. सि.सि.प- ६.२२-२४

[2]. महा.भा.शा- ३०६/४३

[3]. सां.का.- ३

**पञ्चविंशतित्त्वज्ञो यत्र तत्राश्रमे वसेत्।**

**जटी मुण्डी शिखी वाऽपि मुच्यते नात्र संशयः॥**

सांख्याः मन्यन्ते प्रकृतिपुरुषयोः संयोगः बन्धनस्य कारणमस्ति। परन्तु तत्त्वज्ञानेन अनयोः पृथक् ज्ञानं लभ्यते। येन मोक्षः प्राप्यते इति सांख्याः मन्यन्ते।[4] अत्र एवं ज्ञायते बन्धनं, मोक्षः च प्रकृतेः भवति न तु पुरुषस्य। अपि च पुरुषः बन्धनं, मोक्षः च नानुभवति। प्रतिबिम्बरूपमिथ्या दुःखवियोगमात्रेव पुरुषस्य अपवर्गः।

सांख्यदर्शने पुरुषमसङ्गः इति उच्यते।[5] अर्थात् दर्शनेस्मिन् आत्मनः असंगता इति प्रतिपाद्यते। असंगतायाः तात्पर्यमस्ति सर्वात्मस्वरूपावस्थानं, यत् गोरक्षनाथाचार्येण सिद्धासिद्धान्तपद्धतौ अवधूतं सर्वात्मस्वरूपमिति स्वीक्रियते। अर्थात् अवधूतं गुरुरूपेण स्वीकृत्य योगसाधनां करोति चेत् योगकार्ये सिद्धिः प्राप्नोति। अपि तेषां मोक्षश्च भवति।

**<u>योगदर्शने प्रभावः</u>**

आस्तिकदर्शनेषु योगदर्शनं प्रमुखं स्थानं भजते। याज्ञवल्क्यमतानुसारं योगदर्शनस्य प्रवर्तकः हिरण्यगर्भो भवति। पतञ्जलिस्तु तस्यानुशासनमेव कृतवान्। योगदर्शनस्य मौलिकग्रन्थः योगसूत्रम्। अस्य प्रवर्तकः व्याकरणमहाभाष्यस्य रचयिता, चरकसंहिताकर्ता पतञ्जलिरेव भवति। तदुक्तं-

**योगेन चित्तस्य पदेनवाचां मलं शरीरस्य च वैद्यकेन।**

**योऽपाकरोतं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥**

योगसूत्रे चत्वारो पादाः विद्यन्ते। यथा- समाधिपादः, साधनपादः, विभूतिपादः, कैवल्यपादश्च। प्रथमे पादे योगस्वरूपस्य विस्तृतं निरूपणं वर्तते। द्वितीये पादे क्रियायोगः तत्साधनानि यमादीनि च वर्णितानि सन्ति। तृतीये पादे अन्तरङ्गसाधनं ध्यानधारणसमाधिस्वरूपं संयमपदव्यपदेश्यम्। चतुर्थे पादे जन्मौषधिमन्त्रतपः समाधिजसिद्धिपञ्चकं, तत्सम्बद्धं कैवल्यरूपं परमप्रयोजनं निरूपितम्। षडविंशतिस्तत्त्वानि। सांख्यस्य पञ्जविंशतिः तत्त्वानि, ईश्वरः योगदर्शने षडविंशतिः तत्वरूपेण स्वीक्रियते। **सः क्लेशकर्मविपाकशयैरपरामृष्टः पुरुषविशेषः।** योगदर्शनोपरि अनेकाः टीकाग्रन्थाः लभ्यन्ते। तेषु सिद्धसिद्धान्तपद्धतिः हठयोगस्य प्रतीकात्मकग्रन्थरूपेण योगाकाशे नूतनं प्रभावं संस्थापयति। महर्षिपतञ्जलिना वर्णिताः योगशास्त्रस्य विषयाः गोरक्षनाथेनाऽपि सिद्धसिद्धान्तपद्धतेः स्वीकृताः। यद्यपि नाथसम्प्रदाये षडङ्गयोगः स्वीकृतः परन्तु गोरक्षनाथेन सिद्धसिद्धान्तपुस्तके अष्टाङ्गयोगः

---

[4]. पुंप्रकृत्योर्वियोगोऽपि योग इत्यभिधियते।

[5]. असङ्गोऽयं पुरुष इति। सां.द- १.१५

स्वीक्रियते। परन्तु अत्र एवं वैषम्यं दृश्यते यत् महर्षिपतञ्जलिना अष्टाङ्गयोगे यमस्य नियमस्य पञ्चाङ्गानां वर्णनक्रमे श्रीगोरक्षनाथेन एतयोः द्वयोः दशविभागाः प्रपञ्चिताः सन्ति।

आसनस्य संख्या यद्यपि महर्षि पतञ्जलिना योगसूत्रे न वर्णिता। परन्तु योगभाष्ये महर्षिव्यासेन स्वस्य भाष्ये पद्मासनं, वीरासनं, भद्रासनं, स्वस्तिकासनं, दण्डासनादीनि नामानि लिखितानि सन्ति।[6] गोरक्षनाथेनाऽपि सिद्धसिद्धान्तपद्धत्यां प्रमुखासनाना नामानि लिखितानि यथा- स्वस्तिकासनं, पद्मासनं, सिद्धासनमिति। एतेषु त्रिषु एकमासनं विधाय सावधानेन स्थातव्यम्।[7]

योगदर्शने ईश्वरः परमतत्त्वरूपेण परिगण्यते। दर्शनेस्मिन् ईश्वरस्योपयोगीता मौलिकमस्ति। कारणमत्र वर्तते ईश्वरप्रणिधानेन समाधिः सिद्ध्यति। सिद्धसिद्धान्तपद्धतौ गोरक्षनाथेन परासंवित्तिः परमतत्त्वरूपेण स्वीक्रियते। परासंवित्तिः निरपेक्षा, चेतना तत्त्वं वर्तते। या शिवः, ब्रह्म, परमात्मादि नामभिर्ज्ञायते। गोरक्षनाथेन पिण्डविषयोपरि गुरुत्वं प्रददाति, महर्षिपतञ्जलिनापि यद्यपि साक्षात् पिण्डविषये कुत्रापि वर्णनं न कृतं तथापि परोक्षेण एवमवगम्यते यत् शरीरस्य सुस्वाथ्यलाभाय सम्पूर्णं योगशास्त्रं तेन प्रणितम्।

**<u>न्यायदर्शने प्रभावः</u>**

नीयते अयनं येनासौ न्याय। नीयते विवक्षितार्थः सिद्धिरनेनाऽसौ न्यायः। नीयमेन ईयते इति न्यायः। न्यायशास्त्रस्य महत्वन्तु सर्वशास्त्रोपकारकत्वेन सर्वत्रैव प्रसिद्धमस्ति। तथा चोक्तम्-

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**

**आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता॥**

**सम्यक् दर्शनसम्पन्नः कर्मभिर्न निबध्यते।**

**दर्शनेन विहीनस्तु संसारं प्रतिपद्यते॥**

न्यायशास्त्रमतीव प्राचीनं शास्त्रं वर्तते। न्यायदर्शनस्य कर्ता महर्षिगौतमोऽस्ति। प्राच्यन्यायग्रन्थेषु गौतमप्रणीतं न्यायसूत्रं सर्वप्राचीनं विद्यते। न्यायसूत्रे पञ्चाध्यायाः, (प्रमाणप्रमेयसंशयप्रयोजनेत्यारभ्य हेत्वाभासश्च यथोक्ताः इत्येतत् पर्यन्तं तदिदं पञ्चाऽध्यात्मकं न्यायशास्त्रम्।) दशाह्निकानि (प्रत्यध्यायमाह्निकद्वयमस्ति), चतुराशितिप्रकरणानि, पञ्चोत्तरशताष्टविंशतिः सूत्राणि, एकशत्तोतरषड्नवतिपदानि, ८३८५ अक्षराणि च भवन्ति। न्यायदार्शनिकैः परतः प्रमाण्यमङ्गीक्रियते। एते

[6]. तद्यथा पद्मासनं वीरासनं भद्रासनं स्वस्तिकं दण्डसनं सोपाश्रयंपर्यङ्ककोञ्चनिषदनं हिस्तनिषदनं उष्ट्रनिषदनं समसंस्थान स्थिरसुखं यथा सुखं चेत्येवमदीनि। व्या.भा.यो.सू- २.४६

[7]. सि.सि.प- २.३४

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 13 Issue 7, July- 2023
ISSN(o): 2249-7382 | Impact Factor: 8.018
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

असत्कार्यवादिनो भवन्ति। एतेषां ख्यातिवादः द्विधाः विभज्यते। यथा- विपरीतख्यातिः, अन्यथाख्यातिः च।

सुखदुःखात्मकमनोवृत्त्योर्नाशे जाते मनः साम्यावस्थां प्रतिपद्यते। तदा आत्यन्तिकदुःखनिवृत्तिर्भवति सैव मुक्तिः।[8] श्रीगोरक्षनाथेन अवधूतस्य सुखदुःखात्मिकामनोवृत्त्योर्नाशेन साम्यवस्थास्वरूपः भवति। न्यायदार्शनिकाः परमाणुवादिनः अपि कथ्यन्ते। येन तस्य मोक्षप्राप्तिर्भवति। जयन्तभट्टेन उक्तं- स्वरूपेण व्यवस्थानमनो मोक्षः।[9] जीवन्मुक्तिरपरनिःश्रेयसशब्देन विदेहमुक्तिश्च प्रतिपाद्यते।

न्यायदर्शने यथा दुःखस्य आत्यन्तिकनिवृत्तिः भवति अपवर्गः तथा श्रीगोरक्षनाथेन उक्तं यत्- अबधूतः दुःखस्योपरि भवति, सः जितेन्द्रियः। सः कदापि सुखदुःखं नानुभवति येन तस्य स्वरूपस्थितिः सिद्ध्यति। अर्थात् सः मोक्षमार्गस्य अधिकारी भवति।

**<u>वैशेषिकदर्शने प्रभावः</u>**

विशेष इत्यत्र ठक् प्रत्यये कृते वैशेषिकशब्दस्य निष्पत्तिर्जायते। विशेष इति व्यवच्छेदकार्थः। विशेषाभ्यां व्यवच्छेदकाभ्यां साधर्म्यवैधर्म्याभ्यां प्रभवतीति वैशेषिकम्। वैशेषिकदर्शनस्य कर्ता महर्षिकणादः, कणभक्षो वा अस्ति। अतः अस्य दर्शनस्यापरं नाम काणाददर्शनमिति विद्यते। इतोपि औलुक्येन प्रणीतत्वात् वैशेषिकस्यापरं नाम औलूक्यदर्शनमिति कथ्यते। एतद्दर्शनं सांख्यदर्शनात् प्राक् रचितमिति केचन निगदन्ति। केचन प्रवदन्ति स्वयमेव उलूकस्य रूपं धृत्वा तस्मै कणादाय षट्पदार्थान् उपदिदेश अतः अस्य औलुक्यमिति नाम भवति।

वैशेषिकदर्शनस्य आदिग्रन्थे दशाध्यायाः विद्यन्ते। प्रथमेऽध्याये आह्निकद्वयमस्ति। प्रथमाह्निके जातिमन्निरूपणम्, द्वितीयाह्निके जातिविशेषयोर्निरूपणम्। द्वितीयाध्याये आह्निकद्वये द्रव्यनिरूपणम्। तृतीयाध्याये आत्मान्तःकरमलक्षणम्। चतुर्थाध्याये शरीरतदुपयोगिविवेचनम्। पञ्चमाध्याये कर्मप्रतिपादनम्। षष्ठाध्याये श्रौतधर्मनिरूपणम्। सप्तमे गुणसमवायप्रतिपादनम्। अष्टमध्याये निर्विकल्पसविकल्पकप्रत्यक्षप्रमाणादिचिन्तनम्। नवमाध्याये बुद्धिवशेषप्रतिपादनम्। दशमेऽध्याये अनुमानभेदप्रतिपादनञ्च विद्यते।

न्यायवैशेषिकयोः समानतन्त्रं भवति। न्यायदर्शने प्रतिपादितानां विषयाणां समानः विचारः वैशिषिकदर्शने समुपलभ्यते। परन्तु अत्र विशेषः इति पदार्थः स्वतन्त्रतया परिगण्यते। नायदर्शने प्रमाणं

---

8. दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदन्तराभावादपवर्गः। न्या.द – १.१.२

9. न्यायमञ्जरी

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 13 Issue 7, July- 2023
ISSN(o): 2249-7382 | Impact Factor: 8.018
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

प्रधानतया विचार्यते, वैशेषिके तु प्रमेयस्य प्रधानतया विचारः क्रियते। अस्य शास्त्रस्य सर्वोपकारकत्वं प्रतिपाद्य उच्यते- काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्।

महर्षिकणादः आत्मानं नीत्यं मनुते, शास्वतः, अखण्डस्य स्वरूपस्य प्रतिपादनमस्ति। प्रसङ्गेस्मिन् कणादेनोऽक्तम्- **सदकारणवन्नित्यम्।**[10] गोरक्षनाथेनाऽपि अवधूतः अखण्डः श्वासतः, नीत्योऽपि स्वीकृतः।

वैशेषिकदर्शने निष्कामकर्मणि वलं दीयते। निष्कामकर्मणि सत्वसिद्धिर्भवति, सत्वसिद्ध्यात् तत्त्वज्ञानस्योत्पत्तिर्जायते। मिथ्याज्ञानस्य निवृत्तिः तत्वज्ञानेन भवति। येन मोक्षः प्राप्यते। इतोपि कर्मचक्रस्य समाप्त्यनन्तरं जन्ममरणपरम्परायाः समाप्त्या दुःखानां नाशो जायते, येन मोक्षः लभ्यते।[11] श्रीगोरक्षनाथेन अवधूतः कर्मचक्रात् विमुक्तपुरुषः इति उक्तम्। कर्मणः पञ्चप्रकाराः सन्ति इति गोरक्षनाथेन सिद्धसिद्धान्तपुस्तके लिखितम्। शरीरप्राप्तये पञ्चप्रधानकारणानि भवन्ति।[12] शुभाशुभकर्मयोः अनुकूलवासनया शरीरं प्राप्यते। बिन्दुरूपशरीरस्य निमितकारणे कर्मवासने च भवतः। कर्मणः पञ्चगुणाः भवन्ति।[13]

शरीरोत्पत्तेः एतानि कारणरूपपञ्चकर्माणि आवश्यकानि भवन्ति। शुभकर्मणा स्वर्गादिः प्राप्यते। अशुभकर्म पापाय प्रेरयति। पुण्यकर्मणा यशः वर्धते। अपकर्मणा अपकीर्तिः मिलति। येन कर्मणा चर्मचक्षुः तथा इंद्रियजन्यज्ञानस्य अप्रत्यक्षं भवति तत् अदृष्टफलसाधनमिति उच्यते। सिद्धसिद्धान्तपद्धत्याम् एवं लिखितमस्ति यत् एतस्मात् कर्मणः परो भवति अवधूतः। अतः अवधूतः सर्वदर्शनस्य समन्वयो भवति।

**<u>मीमांसादर्शने प्रभावः</u>**

मींमासा इति शब्दःमान- पूजायां, मान- विस्तारे च धातोः निष्पद्यते। यस्मिन् शास्त्रे धर्मस्य वेदार्थस्य च विचारणा, मीमांसा वा क्रियते तन्मीमांसाशास्त्रमिति उच्यते। सर्वदर्शनकौमुद्यां- स्थूलतो वेदार्थविचारो मीमांसा, तत्प्रतिपादकं दर्शनञ्च मींमासादर्शनम्। अपरत्रोच्यते- दर्शनेस्मिन् कर्मकाण्डस्य प्राधान्यप्रतिपादनाद्धर्मस्य च तत्वमीमांसनादस्य मीमांसा इति उच्यते। अस्य शास्त्रस्य पूर्वतनं नाम न्यायशास्त्रम् इति आसीत्। वेदेषु प्रतिपादितं न्यायानां विचारम् अस्मिन् शास्त्रे भवति।

मीमांसादर्शनस्य प्रवर्तकः महर्षिजैमिनिः। जौमिनीनामानुसारेण अस्य दर्शनस्य नाम जौमिनिदर्शनमिति उच्यते। शास्त्रेषु अनेके जैमिनयः दृश्यन्ते परन्तु पूर्वमींमासाशास्त्रस्य प्रणेता महर्षिव्यासदेवस्य शिष्यः जौमिनिरस्ति। धर्मविचारप्रधानत्वेन मींमासाशास्त्रं ज्ञायते। मीमांसादर्शनस्य भागद्वयं वर्तते यथा – पूर्वमींमासा, उत्तरमींमासा चेति। महर्षिजैमिनिना पूर्वमीमांसाशास्त्रं प्रणीतम्।

[10]. वै.द- ४.१.१

[11]. दुःखात्यन्तोच्छेगापरपर्यायानिःश्रेयसरूपत्वेन परमपुरुषार्थत्वात्। स.द.सं- पृ.४४७

[12]. कर्म कामश्चन्द्रः सूर्योऽग्निरिति प्रत्यक्षकरणपंचकम्। सि.सि.प- १.६२

[13]. शुभमशुभं यशोऽपकीर्तिरदृष्टफलसाधनमिति पञ्चगुणाः। सि.सि.प- १.६३

**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 13 Issue 7, July- 2023
ISSN(o): 2249-7382 | Impact Factor: 8.018
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

उत्तरमीमांसा तु वेदान्तदर्शनमिति नाम्ना अभिधीयते। मीमासादर्शनस्य महत्वं चतुदर्शविद्याषु अन्तर्भवति। अस्य दर्शनस्य कालः ख्रीष्टब्दात् प्रागेव कैश्चिद्विद्वद्भिः स्वीक्रियते। मीमांसादर्शनवादिनः परतः प्रमाण्यं स्वीकुर्वन्ति।

मीमासादर्शनस्य मूलग्रन्थे द्वादशाध्यायाः सन्ति। प्रथमपादस्य नाम तर्कपादः। मीमांसादर्शने प्रमुखतया द्वादशविषयाः सन्ति। अतः द्वदशलक्षणी इति कथ्यते। दर्शनस्यान्ते चत्वारोऽध्यायाः विद्यन्ते। एते सङ्कर्षणकाण्डनाम्ना ज्ञायन्ते। दर्शनेस्मिन् पञ्चप्रत्यययाधिकरणं विद्यते। यथा-

**विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।**

**निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्॥**

एकत्वेऽपि परम्।[14] इति महर्षिजैमिनिना पूर्वमीमांसाशास्त्रे उल्लिखितम्। येन एवं ज्ञायते एकं परमात्मा श्रेष्ठः भवति। यद्यपि गोरक्षनाथेन साक्षादेव आत्मा श्रेष्ठमिति न स्वीकृतम् परन्तु सिद्धसिद्धान्तपद्धत्याम् एवं स्वीकृतं यत् अवधूतः श्रेष्ठः भवति। कारणमत्र वर्तते यत् आत्मस्वरूपज्ञानाय सद्गुरोः कृपा प्रयोजनमस्ति।[15] अवधूतः सद्गुरुरेव भवति। तस्य आत्मा श्रेष्ठः भवति। सद्गुरोः कृपया शिष्यस्य जन्म- मृत्यु- काम- क्रोध- लोभ- मोह- अहंकार- अविद्यादिनां विनाशपूर्वकं आत्मास्वरूपे अवस्थापनं भवति।

गोरक्षनाथेन मन्यते आत्मस्वरूपज्ञानं प्रमुखप्रयोजनं वर्तते। साधकः आत्माविषये ज्ञात्वा एव मिथ्याज्ञानं परित्यजति। अपि तु साधनपथि अग्रे गत्वा शिवस्वरूपे लीनः भवति। येन तस्य मोक्षः भवति।

**<u>वेदान्तदर्शने प्रभावः</u>**

वेदान्तो वेदस्यान्तिम भागः वर्तते। वेदस्यान्तिम भागः तु उपनिषद् भवति। उपनिषदेव प्राचीनैः वेदान्तशब्दैः ज्ञायते। वेदान्तसारे सदानन्देन उक्तं यत् वेदान्तो नाम उपनिषत्प्रमाणमिति। भारतीयदर्शनं वेदान्तदर्शनपर्यवसायी अस्ति। यतोऽत्र सर्वत्र दर्शनेषु क्रमविकाश इव प्रतीयते। प्रथमं कणादस्यारम्भवादः, अनन्तरं गौतमस्य परमाणुवादः, तत्पश्चात् सांख्यस्य परिणामवादः, सर्वान्ते वेदान्तस्य विवर्तवादः। अस्य दर्शनस्य प्रणेता महर्षिवादरायणव्यासोऽस्ति। महर्षिव्यासदेवेन ब्रह्मसूत्राणि प्रणीतानि। एतानि सूत्राणि पाणिनेरपि प्राचीनानि। इमे सर्वाः वेदान्तसिद्धान्ताः। अज्ञाननाशे सति सर्वं जगद् ब्रह्ममयं सदेवाऽनुभवगोचरीभूतं भवति। यथोक्तम्-

**यथा रज्जुं परित्यज्य सर्पं गृह्णति वै भ्रमात्।**

**तद्वत्सत्यमविज्ञाय जगत् पश्यति मूढधीः॥**

---

[14]. पूर्वमीमांसा- २.४.१३

[15]. तज्ज्ञेयं सद्गुरोर्वक्त्रात् नान्यथा शास्त्रकोटिभिः। सि.सि.प- ५.६६

**रज्जुखण्डे परिज्ञाते सर्परूपं न तिष्ठति।**

**अधिष्ठाने तथा ज्ञाते प्रपञ्चे शून्यतां गते॥**

वेदान्तदर्शनं उत्तरमीमांसादर्शनमिति उच्यते। मींमासायाः प्रथमो भागः कर्ममीमांसा अस्ति। उत्तरभागस्तु उत्तरमीमांसा, शारीरकमींमासा वा नाम्ना अभिधियते। समालोचकैः निर्णायकशास्त्रत्वेन परीगण्यते। इतोपि ज्ञानयोगस्य एका शाखा वेदान्तः। वेदान्तो नाम जीवब्रह्मणोरभेदबोधकं वाक्यमित। वेदान्तदर्शनस्य मूलं भगवतावादरायणव्यासेन विरचितं ब्रह्मसूत्रम्। ब्रह्मसूत्रमनेके विद्वांसः स्वस्वदृष्ट्या व्याख्यायितवन्तः। ततः वेदान्तक्षेत्रे विविधाः सम्प्रदायाः उत्थिताः। तेषु प्रमुखाः अद्वैत- विशिष्टद्वैत- शुद्धाद्वैत- द्वैत- द्वैताद्वैतादयः प्रसिद्धाः सन्ति।

गोरक्षनाथेन स्वरूपदर्शनमालोचितम्। स्वरूप इत्युक्ते आत्मा इति अभिधीयते। यद्यपि सर्वेषु दर्शनेषु स्व स्व मतमधिकृत्य भेदः प्रदर्श्यते परन्तु आत्मास्वरूपविषये साम्यं परिदृश्यते। सर्वे मन्यन्ते आत्मा नित्य- निरंजन- निर्लिप्त- कूटस्थ- अजर- अमर- शिव- शक्तेः च स्वरूपमस्ति।

लौकिकसमाजे शिवशक्ती भिन्ने भवितुं शक्येते अपि तु संसारे सर्वे प्राणिनः भिन्नाः द्रष्टुं शक्यन्ते परन्तु पारमार्थिकस्तरे चन्द्रचान्दिनीव शिवशक्ती स्तः। एतद् अद्वैतवादस्य मतं स्वीक्रियते। यथा संङ्कराचार्येण जीवब्रह्मणोः अभेदः स्वीकृतः, तथैव गोरक्षनाथेन स्वस्य पुस्तके अद्वैतवादः स्वीक्रियते। अर्थात् शिवशक्त्योः द्वैतता नास्ति। अर्थात् एतौ न द्वे स्तः।

आत्मानः स्वरूपविवेचने श्रीगोरक्षनाथेन गोरक्षसंहितायाम् उक्तम्- अहमाद्ये, मध्ये, अन्ते च तिष्ठामि, अहमपि बन्धनमुक्तः, मम स्वभावः निर्मलः शुद्धः च अस्ति। एवं मम नूनं मतिरस्ति।[16] गोरक्षनाथेन द्वैताद्वैतवादः स्वीकृतः। तेनोऽक्तं परमतत्त्वस्य द्वैताद्वैतविषये भक्तिवादिनः न स्वीकुर्वन्ति। परन्तु नाथयोगिनः सरलाः निष्पकपटाः च भवन्ति। मीमांसकाः मन्यन्ते परमतत्त्वं द्वैतं परन्तु वेदन्तिनः परमतत्त्वमद्वैतमिति स्वीकुर्वन्ति। परन्तु द्वैताद्वैतः प्रकृतेः विकारोऽस्ति।[17] परमतत्त्वं द्वैताद्वैतविवर्जितो भवति।[18] अतः नाथयोगिनः परमतत्त्वं द्वैताद्वैत इति अस्वीकुर्वन् सर्वजीवान् शिवशक्तेः स्वरूपमिति मत्वा परमानन्दस्य अनुभवं कुर्वन्ति। अवधूतयोगी परमानन्दमास्वादयति।

**चार्वाकदर्शने प्रभावः**

नास्तिकदर्शनेषु चार्वाकदर्शनं परिगण्यते। चारुः वाक् इति चार्वाक्। दर्शनस्यास्य प्रणेता महर्षिवृहस्पतिः। चार्वी श्रवेणमात्रेण मनोहरिणी वाक् वचनं यस्यासौ सः चार्वाक्। लोकायतदर्शनं,

---

[16]. आदिमध्यान्तमुक्तोऽहं न बद्धोऽहं कदाचन।
स्वभाव निर्मलः शुद्ध इति मे निश्चला मतिः॥गो.सि.सं- १.४४

[17]. एतदुभयमपि प्रकृतिः विकारः। गो.सि.सं- पृ.३४

[18]. यद् द्वैताद्वैत परं निश्चलं दृश्यते तदेव सत्यमित्युभ्युपगमिष्यामः।गो.सि.सं- पृ.३४

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 13 Issue 7, July- 2023
ISSN(o): 2249-7382 | Impact Factor: 8.018
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

लोकायतिकदर्शनं, पाषाण्डदर्शनं, बाह्यदर्शनं, देहात्मवादः इत्यादि दर्शनस्यापरं नाम अस्ति। बार्हस्पत्यसूत्रेषु चार्वाकसिद्धान्तस्य विषयवस्तुः स्पष्टतया ज्ञातुं शक्यते। एते चत्वारि तत्त्वानि स्वीकुर्वन्ति। यथा- पृथ्वी- जल- वायु- अग्न्यादि। एतानि चत्वारि तत्त्वानि प्रत्यक्षभूताः पदार्थाः प्रमेयाः भवन्ति। एतैरेव जगतः प्रत्येकं वस्तुः निष्पद्यते।

चार्वाकसम्प्रदायिनः केचन आकाश- प्राण- मनांस्यपि पदार्थत्वेनाङ्गीकुर्वन्ति। प्रत्यक्षम् इति एकमेव प्रमाणं स्वीक्रियते। प्रलये एतेषां विश्वासः नास्ति। सृष्टिर्न ईश्वरेण, न ईश्वरेच्छया वा सम्भवति अपि तु स्वयं सिद्धैवेति एते अभिप्रयन्ति। त्रसरेणूनां संस्थानविशेषेण सङ्घटनामात्रेण वा वस्तुः सम्भवति। भूतानां संस्थानाच्चैतन्यम् उपजायते। त्रसरेणुः क्षणिकः। अतः तन्निर्मितपदार्थ- जीव- शरीराणि अपि क्षणिकान्येव। देहस्य विनाशानन्तरं तस्य पुनरागमनं न भवति। अतः एते यावज्जीवेत् सुखं जीवेत् इति मतमुल्लिखन्ति।

चार्वाकाः तर्कनिपुणाः, वाग्मुग्धाः च सन्ति। एते शरीरमात्मा इति मन्यन्ते। अपि तु एते परलोकफलात् निवृत्ताः भवन्ति। येन तेषां मोक्षं न भवति। एवं प्रकारेण तमोगुणिनः हिंसाकर्मणि लिनाः जनाः क्षणिकसुखं तु लभन्ते परन्तु मोक्षपदः तेषां स्वप्नेति भवति।[19]

अतः एवं ज्ञायते यत् नाथयोगिनः क्षणिकसुखं न इच्छन्ति। एते संसारभोगात् दूरं भवन्ति। येन एतेषां मोक्षः भवति। यद्यपि गोरक्षनाथेन शरीरं प्राधान्यं यच्छति परन्तु शरीरम् आत्मा इति न स्वीकुर्वन्ति।

**<u>जैनदर्शने प्रभावः</u>**

जैनदर्शनं नास्तिकदर्शने अन्तर्भवति। बौद्धजैनदर्शनयोः समयः प्रायः समानः। जैनदर्शनस्य प्रवर्तकः ऋषभनाथः। जैनदर्शनसम्प्रदाये चतुर्विंशतितीर्थङ्कराः आसन्। एतेषु जैनदर्शनस्य प्रचारप्रसाराय महावीरवर्धमानस्य महत्वपूर्णा भूमिका अस्ति। जैनाः वेदनिन्दकाः। अतः ते नास्तिकाः इति उच्यन्ते। जगति सर्वेषां वस्तूनां परिणामः सप्तभिः तत्त्वैः भवति। यथा- जीवः, अजीवः, आस्रवः, बन्धः, सम्वरः, निर्जरा, मोक्षश्च। अत्र जीवाजीवौ द्रव्यम्। दुःखत्रयनिवृत्यर्थं रत्नत्रयमेतैरङ्गीक्रियते। यथा- सम्यग्दर्शनं, सम्यज्ज्ञानं, सम्यक् चरित्रं चेति। रत्नत्रयस्य एक एव मोक्षमार्गः।

जैनसम्प्रदायः द्विधा अस्ति। यथा श्वेताम्वरः दिगाम्वरश्चेति। जैनानां पञ्चव्रतानि भवन्ति अहिंसा, सत्यम्, अस्तेयम्, ब्रह्मचर्यमपरिग्रहः। षड् देवताः सन्ति- सर्वज्ञः, वीतरागः, अर्हन्, केवली, तीर्थङ्करः, जिनश्चेति। पदार्थानां यथार्थवक्ता, रागद्वेषादिशून्यः, त्रिलोकपूज्यः सर्वज्ञः “अर्हन्” एव परमेश्वरो भवति।

---

[19]. चार्वाकाश्चतुराश्च तर्कनिपुणा देहात्मवादे रताः।
ते सर्वे न तरन्ति दुःसहतरं ये ते परं सात्विकाः॥
ते सर्वे प्रभवन्ति ये च यवना पापे रता निर्दयाः।
तेषामैहिककल्पमेव हि फलं तत्त्वं न मोक्ष पदम्॥सि.सि.प- ६.७७

दर्शनेस्मिन् सप्तभङ्गिनयः वर्तते। स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यं, स्यादस्ति च अव्यक्तञ्च, स्यान्नास्ति च अव्यक्तं, स्यादस्ति च नास्ति अव्यक्तञ्च। कायिक- वाचिक- मानसिकक्रियाः योगा इत्युच्यन्ते। एतेन कर्मपुद्गलः आत्मनि प्रविशति। तन्निरोधार्थं यः योगस्य प्रशस्तनिग्रहः सः गुप्तिरित्युच्यते।

जैनदर्शने योगस्य प्रभावः दृश्यते। प्रत्यक्षे परोक्षे वा जैनदर्शने सिद्धसिद्धान्तपद्धत्याः प्रयोगः दृश्यते। यथा जैनसम्प्रदाये विभागोऽस्ति तथैव नाथसम्प्रदाये विभागः विद्यते। जैनदर्शनान्तर्गताः पञ्चमहावर्ताः सिद्धसिद्धन्तपद्धत्यां वर्णिताः अष्टाङ्गयोगे यमस्य अङ्गत्वेन परिगण्यन्ते।

जैनदार्शनिकाः मन्यते जीवः स्वभावेन मुक्तरस्ति। परन्तु कर्मावरणेन तस्य बन्धनं भवति। कर्मत् विरतः यदा भवति। तदा जीवस्य मोक्षः भवति। गोरक्षनेथेनापि एतद् स्वीकृतं परन्तु तेनोक्तं साधकः निष्कामकर्मं करणीयं येन तस्य सांसारिकबन्धनात् विमुक्तः लभ्यते। एवं रूपेण जैनदर्शने सिद्धसिद्धान्तपद्धत्याः प्रयोगः दृश्यते।

**<u>बौद्धदर्शने प्रभावः</u>**

बौद्धदर्शनमास्तिकदर्शनमस्ति। बौद्ध- जैनसम्प्रदाययौ प्रायः समसामायिकौ। अस्य दर्शनस्य प्रणेता महात्मा गौतमबुद्धः। बुद्धस्यार्थो भवति पण्डितः ज्ञानी वा। तस्यापरं नाम सिद्धार्थ आसीत्। आधुनिकनेपालराज्यस्य लुम्बिनी इति प्रसिद्धं स्थानं बुद्धस्य जन्मस्थानमासीदिति। बुद्धस्य पिता शुद्धोधनः। सः शाक्यवंशस्य शासकः आसीत् । गौतमस्य माता मायादेवी। सा वस्त्रकारपरिवारीयराजकुमारी बभूव। यदा सिद्धार्थः वालः आसीत् तदा तस्य मातृवियोगः जातः। मायादेव्याः भगिनी गौतमी सिद्धार्थस्य पालनं कृतवती। तस्मात् तस्य नाम गौतमः। गौतमेन प्रणीतं दर्शनं बौद्धदर्शनमिति नाम्ना ज्ञायते। भगवान् बुद्धः भगवतः दशावतारेषु अन्यतममिति नैकेषु पुराणेषु वर्णितं दृश्यते। श्रीमद्भागवते प्रतिपादितोऽस्ति-

**ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम्।**

**बुद्धो नामा जिनसुतः कीकटेषु भविष्यति॥**[20]

गौतमबुद्धेन स्वतन्त्रतया कोऽपि ग्रन्थो न रचितः। परन्तु यदा लिखितपरम्परा प्रारब्धा तदा तस्य शिष्याः स्व स्व भाषया बुद्धमतोपदेशान् एकत्रीकृत्य विभिनानि ग्रन्थानि अलिखन्। बौद्धसाहित्ये प्रचलिता ग्रन्थाः प्रायः द्वादशभागेषु विभक्ताः। तेषु ग्रन्थेषु मौलिकत्वेन महायान- थेरीवादिनो ग्रन्थाः त्रिपिटकेति नाम्ना परिचिताः। यथा- विनयपिटकं, सुत्तपिटकम्, अभिधम्मपिटकञ्चेति। बुद्धस्य त्रयः शिष्याः विनयपिटकस्य प्रचारकाः उपालिः, सुत्तपिटकस्य आनन्दः, अभिधम्मपिटकस्य काश्यपः प्रचारं कृतवन्तः।

20. श्री.म.भा- १/३/४

**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 13 Issue 7, July- 2023
ISSN(o): 2249-7382 | Impact Factor: 8.018
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

बौद्धदर्शनस्यचत्वारः विभागाः सन्ति यथा- योगाचारः, माध्यमिकः, वैभाषिकः, सौतान्त्रिकश्चेति। बौद्धदर्शनस्य सिद्धन्तः निर्वाणः अस्ति। दर्शनेस्मिन् कर्मबन्धनं छित्वा प्रज्ञालाभेन मुक्तिः। करूणा- चित्तस्थैर्य- गौरवत्यागः- शम- दम- क्षान्त्यादिविशिष्टगुणैः प्रज्ञालाभो भवति। बुद्धः, धर्मः, सङ्घश्चेत्यानि बौद्घानां त्रिरत्नानि भवन्ति। बौद्धानां पुनर्जन्मानि विश्वासो वर्तते। बौद्धमते दुःखं नित्यं भवति। जन्ममरणचक्रात् मुक्तिरेव निर्वाणः दुःखनिवृत्तिर्वा उच्यते। दुःखनिरोधार्थमष्टौ मार्गाः बौद्धदर्शने प्रतिपादिताः।

बौद्धदर्शने सिद्धसिद्धान्तपद्धतेः प्रभावः दृश्यते। यथा बौद्धदर्शने वर्णितं संघस्य नियमत्वेन अहिंसा, अपरिग्रहः, ब्रह्मचर्यः, सत्यं, श्रद्धादि स्वीक्रियते, तथैव गोरक्षनाथेन सिद्धसिद्धान्तपद्धात्याम् अष्टाङ्गयोगस्य वर्णनप्रसङ्गे यमनियमयोः अङ्गस्य विभागरूपे गृहीताः। इतोपि बौद्धदर्शने वर्णितेषु ष्टाङ्गमार्गेषु समाधिः एकं मार्गमस्ति तथापि गोरक्षनाथेनापि सिद्धसिद्धन्तपद्धत्यां अष्टाङ्गयोगस्यान्तिमाङ्गत्वेन समाधिः स्वीक्रियते। परन्तु अत्र समाधेः पालनस्य नियमः उभयौ भिन्नौ स्तः। एवं प्रकारेण सिद्धसिद्धान्तपद्धत्याः प्रभावः बौद्धदर्शने दृश्यते। अतः एवं वक्तुं शक्यते यत् गोरक्षनाथेन सिद्धसिद्धान्तपद्धत्याः सर्वदर्शनस्य समन्वयं कृतमिति।